International Journal of Multidisciplinary Horizon

ISSN: 3049-2017
IJMH 2026; 3(1): 265-270
© 2026 IJMH
www.themultijournal.com
Received: 12-02-2026
Accepted: 25-02-2026
Publish : 27-02-2026

**Dr.Sujan Biswas**
Assistant Professor.
Department of Education.
National Sanskrit University.
(A Central University)
Tirupati - 517507(A.P)

**Correspondence:**
**Dr.Sujan Biswas**
Assistant Professor.
Department of Education.
National Sanskrit University.
(A Central University)
Tirupati - 517507(A.P)

# धर्मशास्त्रान्तर्गतस्य विवाहसंस्कारस्य आधुनिकपरिप्रेक्ष्ये औचित्यानौचित्ययोः प्रासङ्गिकता

**Dr.Sujan Biswas**

**सारांशः**
भारतीयसंस्कृतौ षोडशसंस्कारेषु विवाहसंस्कारः प्रधानतमः संस्कारः परिगण्यते। धर्मशास्त्रेषु विवाहः केवलं स्त्री-पुरुषयोः सामाजिकसम्बन्धस्य स्थापना न, अपितु धर्मपालनस्य, कुलपरम्परारक्षणस्य, सन्तानसंस्कारस्य, समाजव्यवस्थायाः च आधारः इति प्रतिपादितः। विवाहसंस्कारे धार्मिकः, नैतिकः, सामाजिकः, व्यवहारिकः तथा तात्त्विकः—एतानि सर्वाणि तत्वानि अन्तर्भवन्ति। प्रस्तुते अध्ययने विवाहसंस्कारस्य व्यवहारिकस्वरूपम्, तस्य तात्त्विकाधारः, धर्मशास्त्रेषु प्रतिपादितानि आदर्शानि तथा आधुनिकसमाजे तेषां प्रासङ्गिकता विवेच्यते।
**कुटशब्दाः**—धर्मशास्त्रम्, विवाहसंस्कारः, आधुनिकपरिप्रेक्षः, औचित्यम्-अनौचित्यम्, प्रासङ्गिकता ।

## भूमिका

भारतीयधर्मशास्त्रेषु मानवजीवनं संस्कारमयं परिकल्पितम्। गर्भाधानात् आरभ्य अन्त्येष्टिपर्यन्तं षोडशसंस्काराः निर्दिष्टाः सन्ति। तेषु षोडशसंस्कारेषु विवाहसंस्कारः विशेषमहत्त्वं धारयति, यतः अस्य माध्यमेन मनुष्यः गृहस्थाश्रमं प्रविशति। अस्य मुख्योद्देश्यं केवलं स्त्री-पुरुषयोः सामाजिकसंयोगः न, अपितु धर्मपालनम्, प्रोजन्मोत्पत्तिः, कुलपरम्परारक्षणम्, समाजव्यवस्थायाः स्थैर्यं च सन्ति। गृहस्थाश्रमः एव अन्येषामाश्रमाणां पोषकः इति धर्मशास्त्रेषु प्रतिपादितम्।

विवाहः केवलं दाम्पत्यजीवनस्य आरम्भः न, अपितु धर्म-अर्थ-काम-मोक्षः एतेषां पुरुषार्थानां समन्वितसाधनम् अस्ति। परन्तु आधुनिकसमाजे विवाहसंस्कारस्य स्वरूपे, प्रयोजने, आवश्यकतायां च विविधाः परिवर्तनाः दृश्यन्ते।सुतरां अद्यत्वे वैश्वीकरणस्य, विज्ञान-प्रौद्योगिक्योः, शिक्षाविस्तारस्य, स्त्रीशिक्षायाः, आर्थिकस्वावलम्बनस्य, मानवाधिकारचिन्तनस्य च प्रभावेण विवाहसंस्कारस्य स्वरूपे महत्त्वपूर्णानि परिवर्तनानि अभवन्। अतः आधुनिकपरिप्रेक्ष्ये विवाहसंस्कारस्य औचित्यस्य तथा अनौचित्यस्य तात्त्विकदृष्ट्या सम्यगध्ययनम् अत्यावश्यकम्।

## 1.विवाहसंस्कारस्य स्वरूपम्

'विवाह' इति शब्दः *वि + वह्* धातुः प्रापणार्थकात् भावे घञ्प्रत्यये आदिवृद्धौ सत्यां निष्पन्नः। विशेषरूपेण उत्तरदायित्ववहनम् इति अस्य भावार्थः।

मनुस्मृतिः, याज्ञवल्क्यस्मृतिः, गृह्यसूत्राणि, धर्मसूत्राणि च विवाहस्य स्वरूपं, विधिं, उद्देश्यं तथा मर्यादां निरूपयन्ति।

वर्तमानसमाजे विवाहस्य स्वरूपे परिवर्तनं दृश्यते। तथापि धर्मशास्त्रेषु प्रतिपादितानि मूल्यानि अद्यापि प्रासङ्गिकानि सन्ति—

- परस्परसमादरः
- समानाधिकारः
- कर्तव्यबोधः
- संवादसंस्कृतिः
- पारिवारिकसौहार्दम्
- नैतिकजीवनम्
- उत्तरदायीपालकत्वम्

आधुनिकशिक्षायां मूल्याधारितजीवनस्य निर्माणाय एतानि सिद्धान्तानि महत्त्वपूर्णानि सन्ति।

**आधुनिकपरिप्रेक्ष्ये धर्मशास्त्रेषु वर्णिताः विवाहप्रकाराणां वर्णनम्**

तत्रापस्तम्बे धर्मसूत्रे षडेव विवाहा उक्ताः – ब्राह्मः, आर्षः, दैवः, गान्धर्वः, आसुरः, राक्षसश्चेति। गौतमेन मनुना च अष्टविधो विवाह उद्दिष्टः प्राजपत्य-पैशाचाम्यां सह। लौगाक्षिगृह्यसूत्रे तु ब्राह्म आसुरश्चैव निर्दिष्टः।

तत्रैतेषाम् आधुनिकपरिप्रेक्ष्ये लक्षणानि क्रमेण व्याख्यास्यामः -

❖ **ब्राह्मविवाहः**

ब्राह्मविवाहः हिन्दुधर्मशास्त्रेषु निर्दिष्टेषु अष्टविवाहेषु श्रेष्ठतमः विवाहप्रकारः मन्यते। मनुस्मृतौ, याज्ञवल्क्यस्मृतौ तथा अन्येषु धर्मशास्त्रेषु अस्य विशेषः गौरवपूर्वकं वर्णितः अस्ति। अस्मिन् विवाहे कन्यायाः पिता सद्गुणसम्पन्नाय, वेदविदुषे, सदाचारीणे, ब्रह्मचर्यसमाप्तिं कृतवते वराय स्वेच्छया कन्यादानं करोति। अत्र धनस्य आदान-प्रदानं न भवति, न च बलात् विवाहः क्रियते, अपितु धर्मपालनं, सदाचारः, कुलमर्यादा च प्रमुखाः भवन्ति।

मनुस्मृतौ उक्तम्—

**"आच्छाद्य चार्चयित्वा च श्रुतशीलवते स्वयम्।**

**आहूय दानं कन्यायाः ब्राह्मो धर्मः प्रकीर्तितः॥"** (मनुस्मृतिः 3.27)

**आधुनिकपरिप्रेक्ष्ये ब्राह्मविवाहः**

आधुनिकसमाजे ब्राह्मविवाहस्य मूलभावनाः—यथा गुणाधारितवर-चयनम्, परस्परसम्मतिः, धार्मिक-सामाजिकोत्तरदायित्वं, पणप्रथा-निषेधः, स्त्रीसम्मानः, समानता च—अद्यापि अत्यन्तं प्रासङ्गिकाः सन्ति। यद्यपि सामाजिकपरिस्थितयः परिवर्तिताः, तथापि ब्राह्म-विवाहस्य नैतिकमूल्यानि आधुनिकविवाहव्यवस्थायाः आदर्शरूपेण स्वीकर्तुं शक्यन्ते।

**ब्राह्मविवाहस्य सुप्रभावः**

- धर्मपालनम्
- सद्गुणसम्पन्नजीवनसाथिचयनम्
- दाम्पत्यसौख्यम्
- पारिवारिकस्थैर्यम्
- सन्ततिनां सदाचारविकासः
- स्त्रीसम्मानस्य संरक्षणम्
- सामाजिकसौहार्दम्
- संस्कृतिसंरक्षणम्
- समाजे आदर्शस्थापनम्

**ब्राह्मविवाहस्य दुष्प्रभावः**

- कन्यायाः स्वेच्छायाः अल्पावकाशः
- वर्णजात्याधारितप्रतिबन्धः
- स्त्रीणां निर्णयाधिकारस्य न्यूनता
- अत्यधिकसंस्कारव्ययः
- सामाजिकखभारस्य सम्भावना
- परम्परानिष्ठायाः अतिप्राधान्यम्
- सामाजिकविषमतायाः सम्भावना
- आधुनिकमूल्यैः सह संघर्षः
- रूढिवादस्य पोषणम्

❖ **दैवविवाहः**

दैवविवाहः धर्मशास्त्रेषु वर्णितानामष्टविवाहप्रकाराणां द्वितीयः विवाहप्रकारः अस्ति। अस्मिन् विवाहे यज्ञकर्मणि नियुक्ताय ऋत्विजे (यज्ञं सम्पन्नयति यः ब्राह्मणः) कन्यादानं क्रियते। यदा कन्यायाः योग्यः वरः समये न लभ्यते, तदा यज्ञसमाप्तौ यज्ञकर्त्रा ऋत्विजे अलङ्कृतां कन्यां धर्मभावनया प्रदीयते। अस्य विवाहस्य प्रमुखोद्देशः धर्मपालनम् एवं यज्ञसंस्कृतेः संरक्षणम् आसीत्।

मनुस्मृतौ दैवविवाहस्य लक्षणमिदं निर्दिष्टम्—

**"यज्ञे तु वितते सम्यगृत्विजे कर्म कुर्वते।**

**अलङ्कृत्य सुतादानं दैवं धर्मं प्रचक्षते॥"** (मनुस्मृतिः 3.28)

**आधुनिकपरिप्रेक्ष्ये दैवविवाहः**

आधुनिकसमाजे वैदिकयज्ञाधारितः दैवविवाहः प्रायः न दृश्यते। तथापि अस्य मूलतत्त्वानि—धर्मनिष्ठा, सदाचारः, योग्यवरस्य चयनम्, धार्मिकजीवनस्य सम्मानः—अद्यापि महत्त्वपूर्णानि सन्ति। आधुनिकमानवमूल्यानुसारं विवाहे स्त्री-पुरुषयोः स्वेच्छा, समानाधिकारः, परस्परसम्मानः च अनिवार्याः मन्यन्ते। अतः दैवविवाहस्य तात्त्विकमूल्यानि ग्राह्याणि, किन्तु तस्य परम्परागतः व्यवहाररूपः वर्तमानसमाजे व्यापकः नास्ति।

**दैवविवाहस्य सुप्रभावः**

- धर्मसंरक्षणम्
- धार्मिकजीवनस्य प्रोत्साहनम्
- योग्यवरस्य प्राप्तिः
- पारिवारिकस्थैर्यम्
- सन्तानानां संस्कारविकासः
- वैदिकसंस्कृतेः संरक्षणम्
- समाजे सदाचारस्य प्रसारः
- सामाजिकसम्मानस्य वृद्धिः
- कर्तव्यपरायणतायाः विकासः
- सामाजिकसौहार्दस्य संवर्धनम्
- आध्यात्मिकविकासः
- मूल्यशिक्षायाः संवर्धनम्

**दैवविवाहस्य दुष्प्रभावः**

- कन्यायाः स्वेच्छायाः अल्पमहत्त्वम्
- यज्ञकेन्द्रितविवाहव्यवस्था
- स्त्रीणां निर्णयस्वातन्त्र्यस्य न्यूनता
- धार्मिकपात्रतायाः अतिप्राधान्यम्
- सामाजिकविषमतायाः सम्भावना
- रूढिपरम्परायाः पोषणम्
- आधुनिकमूल्यैः सह असामञ्जस्यम्
- विवाहे विलम्बस्य सम्भावना
- आर्थिकभारः

❖ **आर्षविवाहः**

धर्मशास्त्रेषु वर्णितेषु विवाहस्य अष्टविधेषु **आर्षविवाहः** तृतीयः विवाहप्रकारः अस्ति। अस्य नामकरणं "ऋषि" शब्दात् निष्पन्नम्। अयं विवाहः ऋषीणां परम्परायाः अनुरूपः मन्यते। अस्मिन् विवाहे वरः कन्यायाः पित्रे धार्मिकभावेन **एकं गोमिथुनं (एकां गां तथा एकं वृषभं) अथवा द्वे गोमिथुने** समर्पयति। एतत् कन्यायाः मूल्यरूपेण न, अपितु धर्मसम्मतप्रतीकात्मकदानरूपेण स्वीकृतम्।

**मनुस्मृतौ** आर्षविवाहस्य लक्षणं निम्नरूपेण निर्दिष्टम्—

**"एकं गोमिथुनं द्वे वा वरादादाय धर्मतः।**

**कन्याप्रदानं विधिवदार्षो धर्मः स उच्यते॥"** (मनुस्मृति 3.29)

**आधुनिकपरिप्रेक्ष्ये आर्षविवाहः**

अद्यतनसमाजे आर्षविवाहस्य मूलस्वरूपं विरलतया दृश्यते, किन्तु अस्य अन्तर्निहिताः मूल्याः—सरलता, धार्मिकता, संयमः, लोभत्यागः, परस्परसम्मानः च—अद्यापि अत्यन्तं प्रासङ्गिकाः सन्ति। आधुनिकविवाहेषु अनावश्यकव्ययस्य न्यूनीकरणे, पणप्रथाया निराकरणे, मूल्याधारितदाम्पत्यजीवनस्य निर्माणे च आर्षविवाहस्य आदर्शाः प्रेरणादायकाः भवन्ति।

**आर्षविवाहस्य सुप्रभावः**

- धर्मशास्त्रसम्मतः विवाहप्रकारः।
- अल्पव्यययुक्तः तथा सरलः।
- दाम्पत्यजीवने धार्मिकमूल्यानां संवर्धनम्।
- सामाजिकसामञ्जस्यस्य पोषणम्।
- लोभवर्जितः तथा कर्तव्यप्रधानः।
- पारिवारिकस्थैर्यम्
- सन्तानानां संस्कारविकासः
- संयमपूर्णजीवनस्य प्रेरणा
- सामाजिकसद्भावः
- सांस्कृतिकसंरक्षणम्
- मूल्यशिक्षायाः संवर्धनम्

**आर्षविवाहस्य दुष्प्रभावाः**

- कन्यायाः स्वातन्त्र्यस्य सीमितता
- प्रतीकात्मकदानस्य विपरीतव्याख्या
- आर्थिकविषमतायाः सम्भावना
- स्त्रीपुरुषसमतायाः सीमितप्रतिबिम्बनम्
- आधुनिकन्यायनियमव्यवस्थया असामञ्जस्यम्
- सामाजिकभ्रान्तेः सम्भावना
- रूढिपरम्परायाः सम्भावना
- आधुनिकमानवाधिकारदृष्ट्या सीमितता

**❖ प्राजापत्यविवाहः**

धर्मशास्त्रेषु वर्णितेषु अष्टविधविवाहेषु **प्राजापत्यविवाहः** चतुर्थः विवाहप्रकारः अस्ति। अयं विवाहः प्रजापतेः धर्मोपदेशस्य आदर्शं वहति। अस्मिन् विवाहे कन्यायाः पिता वर-वधूभ्यां गृहस्थाश्रमस्य कर्तव्यपालनम्, धर्माचरणम्, परस्परसहयोगं च उपदिश्य कन्यां प्रददाति। अतः अयं विवाहः धर्मं, कर्तव्यं, पारिवारिकदायित्वं च आधारभूततत्त्वानि स्वीकृत्य सम्पन्नः भवति।

**मनुस्मृतौ** प्राजापत्यविवाहस्य लक्षणम् एवं निर्दिष्टम्—

**"सहोभौ चरतां धर्ममिति वाचानुभाष्य च।**

**कन्याप्रदानमभ्यर्च्य प्राजापत्यो विधिः स्मृतः॥"** (मनुस्मृति 3.30)

**आधुनिकपरिप्रेक्ष्ये प्राजापत्यविवाहः**

अद्यतनसमाजे प्राजापत्यविवाहस्य तात्त्विकसन्देशः अत्यन्तं प्रासङ्गिकः अस्ति। दाम्पत्यजीवने परस्परसम्मानः, समानदायित्वम्, सहयोगः, नैतिकमूल्यानि च समृद्धपरिवारनिर्माणस्य आधाराः सन्ति। अतः विवाहः केवलं सामाजिकसमारोहः न, अपितु उत्तरदायित्वपूर्णः संस्कारः इति प्राजापत्यविवाहः शिक्षयति।

**प्राजापत्यविवाहस्य सुप्रभावाः**

- धर्मशास्त्रसम्मतः उत्तमविवाहप्रकारः।
- परिवारे उत्तरदायित्वबोधस्य विकासः।
- पति-पत्न्योः समानकर्तव्यभावनायाः पोषणम्।
- सामाजिकसामञ्जस्यस्य संवर्धनम्।
- नैतिकमूल्यानां तथा संस्काराणां संरक्षणम्।
- स्त्रीपुरुषसहकार्यस्य प्रोत्साहनम्

**प्राजापत्यविवाहस्य दुष्प्रभावाः**

- कन्यायाः स्वेच्छायाः अल्पमहत्त्वम्
- पितृप्रधानव्यवस्थायाः प्रभावः
- आधुनिकस्वातन्त्र्यभावनायाः सह असामञ्जस्यम्
- सामाजिकरूढीनां प्रभावः
- व्यक्तिगताभिलाषाणाम् उपेक्षा
- स्त्रीणां समाननिर्णयाधिकारस्य न्यूनता
- रूढिपरम्पराणाम् अन्धानुकरणम्
- आधुनिकसमाजे सीमितप्रचलनम्
- सामाजिकभारस्य सम्भावना
- कर्तव्येषु अतिप्राधान्यम्

**❖ आसुरविवाहः**

धर्मशास्त्रेषु वर्णितेषु अष्टविधविवाहेषु **आसुरविवाहः** पञ्चमः विवाहप्रकारः अस्ति। अस्मिन् विवाहे वरः कन्यायाः पित्रे, बान्धवेभ्यः वा स्वशक्त्यनुसारं बहुधनं दत्त्वा कन्यां गृह्णाति। अयं धनप्रदानः कन्यामूल्यरूपेण गृह्यते। अतः धर्मशास्त्रकाराः अस्य विवाहस्य प्रशंसां न कृतवन्तः, यतः अस्मिन् कन्याया विक्रयस्य भावना दृश्यते, न तु धर्मसंस्कारस्य प्रमुखता।

**मनुस्मृतौ** आसुरविवाहस्य लक्षणम् एवं निर्दिष्टम्—

**"ज्ञातिभ्यो द्रविणं दत्त्वा कन्यायै चैव शक्तितः।**

**कन्याप्रदानं स्वच्छन्द्यादासुरो धर्म उच्यते॥"** (मनुस्मृति 3.31)

**आधुनिकपरिप्रेक्ष्ये आसुरविवाहः**

अद्यतनसमाजे धर्मशास्त्रेषु वर्णितः आसुरविवाहः प्रत्यक्षरूपेण दुर्लभः अस्ति, किन्तु पणप्रथा, आर्थिकलोभः, धनप्रधानविवाहव्यवस्था च तस्य किञ्चित् साम्यं दर्शयन्ति। यद्यपि पणप्रथा (Dowry) तथा कन्यामूल्यप्रथा (Bride Price) परस्परं भिन्ने स्तः, तथापि उभयत्र विवाहे आर्थिकतत्त्वस्य अतिप्राधान्यं सामाजिकसमस्यां जनयति। अतः आधुनिकसमाजे विवाहः समानता, परस्परसम्मानः, स्वेच्छा, नैतिकमूल्यानि च आधारभूततत्त्वानि भवितुमर्हन्ति।

**आसुरविवाहस्य सुप्रभावाः**

- आर्थिकसहायता
- निर्धनपरिवाराणां कृते विवाहसुविधा
- वरस्य आर्थिकसामर्थ्यस्य प्रदर्शनम्
- पारिवारिकसम्बन्धस्य स्थापना
- कन्यायाः आर्थिकसुरक्षायाः भावना
- व्यवहारिकसमाधानम्

**आसुरविवाहस्य दुष्प्रभावाः**

- कन्याया वस्तुवत् परिग्रहस्य प्रवृत्तिः।
- आर्थिकसामर्थ्यस्य आधारेण विवाहनिर्णयः।
- स्त्रीसम्मानस्य हानिः।
- धर्मप्रधानविवाहस्य आदर्शात् विचलनम्।
- सामाजिकविषमताया वृद्धिः।

- दाम्पत्यसम्बन्धेषु असमानता
- स्त्रीसम्मानस्य हानिः

❖ **गान्धर्वविवाहः**

धर्मशास्त्रेषु वर्णितेषु अष्टविधविवाहेषु **गान्धर्वविवाहः** षष्ठः विवाहप्रकारः अस्ति। अस्मिन् विवाहे वर-वध्वोः परस्परप्रेमः, स्वेच्छा तथा पारस्परिकसहमतिः एव प्रमुखाधारः भवति। अत्र न कन्याविक्रयः, न बलप्रयोगः, न च अभिभावकाणां अनिवार्यः हस्तक्षेपः भवति। धर्मशास्त्रेषु अयं **कामसम्भवः विवाहः** इति अपि निर्दिष्टः, यतो हि अस्य मूलं परस्परानुरागः भवति।

**मनुस्मृतौ** गान्धर्वविवाहस्य लक्षणम् एवं वर्णितम्—

**"इच्छयान्योन्यसंयोगः कन्यायाश्च वरस्य च।**

**गान्धर्वः स तु विज्ञेयो मैथुन्यः कामसम्भवः॥"**(मनुस्मृति 3.32)

**आधुनिकपरिप्रेक्ष्ये गान्धर्वविवाहः**

अद्यतनसमाजे **प्रेमविवाहः (Love Marriage)** गान्धर्वविवाहस्य आधुनिकरूपत्वेन परिगण्यते। आधुनिकशिक्षा, व्यक्तिस्वातन्त्र्यम्, लैङ्गिकसमानता, मानवाधिकाराः च अस्य प्रकारस्य विवाहस्य स्वीकारं वर्धयन्ति। तथापि सफलदाम्पत्यजीवनाय केवलं प्रेमः न पर्याप्तम्; उत्तरदायित्वबोधः, परस्परसम्मानः, पारिवारिकसहयोगः, सामाजिकदायित्वबोधः च अपि अनिवार्याः सन्ति।

**गान्धर्वविवाहस्य सुप्रभावाः**

- परस्परसम्मत्याः आदरः।
- प्रेमाधारितदाम्पत्यजीवनस्य स्थापना।
- स्त्री-पुरुषयोः समानभागीदारी।
- पणप्रथा, कन्याविक्रयः इत्यादीनाम् अभावः।
- परस्परविश्वासस्य दृढीकरणम्।

**गान्धर्वविवाहस्य दुष्प्रभावाः**

- केवलं भावावेशेन कृतनिर्णयः दीर्घकाले समस्याः जनयितुं शक्नोति।
- पारिवारिकमार्गदर्शनस्य अभावे सामाजिकविरोधः सम्भवति।
- अपरिपक्ववयसा कृतनिर्णयेषु वैवाहिकस्थैर्यस्य हानिः भवेत्।
- कुलपरम्परा, सांस्कृतिकमूल्यानि वा कदाचित् उपेक्षितानि भवन्ति।

❖ **राक्षसविवाहः**

धर्मशास्त्रेषु वर्णितेषु अष्टविधविवाहेषु **राक्षसविवाहः** सप्तमः विवाहप्रकारः अस्ति। अस्मिन् विवाहे कन्यायाः परिवारजनान् पराजित्य, आहत्य वा बलपूर्वकं कन्याया अपहरणं कृत्वा विवाहः क्रियते। धर्मशास्त्रेषु अयं विवाहः सामान्यजनानां कृते प्रशस्तः न मन्यते, तथापि क्षत्रियाणां युद्धकालीनपरिस्थितिषु विशेषापवादरूपेण अस्य उल्लेखः दृश्यते। अस्य मूलस्वरूपे बलप्रयोगः, युद्धम्, अपहरणम् च प्रमुखतया दृश्यन्ते।

**मनुस्मृतौ** राक्षसविवाहस्य लक्षणम् एवं निर्दिष्टम्—

**"हत्वा छित्त्वा च भित्त्वा च क्रोशन्तीं रुदतीं गृहात्।**

**प्रसह्य कन्याहरणं राक्षसो विधिरुच्यते॥"**(मनुस्मृति 3.33)

**आधुनिकपरिप्रेक्ष्ये राक्षसविवाहः**

अद्यतनभारतीयसमाजे बलात् विवाहः, अपहरणपूर्वकविवाहः, स्त्रीसम्मतिविना वैवाहिकसम्बन्धः च विधिविरुद्धाः तथा दण्डनीयाः अपराधाः सन्ति। आधुनिकविधिव्यवस्थायां विवाहे **उभयोरपि स्वतन्त्रसम्मतिः** अनिवार्या मन्यते। अतः राक्षसविवाहस्य तात्त्विकस्वरूपं आधुनिकमानवाधिकारदृष्ट्या, स्त्रीसमानतादृष्ट्या, संविधानसम्मतदृष्ट्या च सर्वथा अनौचित्यमेव प्रतिपादयति।

**राक्षसविवाहस्य सुप्रभावाः**

- शौर्यस्य प्रदर्शनम्
- क्षात्रधर्मस्य अभिव्यक्तिः
- दृढसङ्कल्पस्य परिचायकः
- साहसगुणस्य विकासः
- क्षात्रसंस्कृतेः संरक्षणम्
- संकटकाले धैर्यधारणम्

**राक्षसविवाहस्य दुष्प्रभावाः**

- स्त्रीसम्मानस्य उल्लङ्घनम्।
- हिंसा, भयम्, अन्यायः च।
- सामाजिकशान्तेः भङ्गः।
- पारिवारिकसम्बन्धानां विघटनम्।
- वैवाहिकजीवने विश्वासस्य अभावः।

❖ **पैशाचविवाहः**

धर्मशास्त्रेषु वर्णितेषु अष्टविधविवाहेषु **पैशाचविवाहः** अष्टमः तथा सर्वाधिकनिन्दितः विवाहप्रकारः अस्ति। अस्मिन् विवाहे कन्यायाः **सम्मतिः न भवति**। सा निद्रिता, मत्ता, प्रमत्ता अथवा अचेतनावस्थायां भवति, तस्याः असहायावस्थायां तया सह अनुचितः सम्बन्धः स्थाप्यते। धर्मशास्त्रकारैः एषः आचारः अत्यन्तं निन्दितः, अधार्मिकः, पापकर्म च इति निरूपितः। अतः अयं विवाहः अनुकरणीयः न, अपितु त्याज्यः एव।

**मनुस्मृतौ** पैशाचविवाहस्य लक्षणम् एवं निर्दिष्टम्—

**"सुप्तां मत्तां प्रमत्तां वा रहो यत्रोपगच्छति।**

**स पापिष्ठो विवाहानां पैशाचश्चाष्टमोऽधमः॥"**(मनुस्मृति 3.34)

**आधुनिकपरिप्रेक्ष्ये पैशाचविवाहः**

आधुनिकविधिव्यवस्थायां स्त्रियाः **स्पष्टा स्वतन्त्रसम्मतिः (Free and Informed Consent)** वैवाहिकसम्बन्धेषु तथा अन्येषु निकट-सम्बन्धेषु अत्यन्तमहत्त्वपूर्णा मन्यते। यत्र सम्मतिः नास्ति, तत्र तादृशः व्यवहारः विवाहरूपेण न स्वीकृतः, अपितु गम्भीरः अपराधः मन्यते। अतः पैशाचविवाहस्य स्वरूपं आधुनिकमानवाधिकारदृष्ट्या, स्त्रीसमानतादृष्ट्या, नैतिकदृष्ट्या, विधिदृष्ट्या च सर्वथा अनौचित्यम् एव प्रतिपादयति।

**पैशाचविवाहस्य सुप्रभावः**

- वीरत्वस्य प्रदर्शनम्
- शक्तेः प्रदर्शनम्
- अहङ्कारस्य प्रदर्शनम्

**पैशाचविवाहस्य दुष्प्रभावाः**

- स्त्रीसम्मानस्य गम्भीरहानिः।

- नैतिकपतनस्य द्योतकः।
- सामाजिकविश्वासस्य तथा सुरक्षायाः हानिः।
- धर्मशास्त्रसम्मतजीवनमूल्यानां विरोधः।
- मानवाधिकाराणां उल्लङ्घनम्।

एतेषु अष्टविवाहेषु ब्राह्मविवाहः श्रेष्ठः इति मन्यते। परन्तु आधुनिकपरिप्रेक्ष्ये प्राजापत्यविवाहस्य प्रचलनं दृश्यते किन्तु गान्धर्वविवाहस्य प्रचलनं अत्यधिकं दृश्यते।

## 2. आधुनिकपरिप्रेक्ष्ये विवाहसंस्कारस्य प्रयोजनीयता

### क) पारिवारिकस्थैर्यस्य संरक्षणम्

विवाहसंस्कारः सुदृढपरिवारस्य आधारः अस्ति। आधुनिकसमाजे अपि स्वस्थपरिवारनिर्माणे अस्य महत्त्वम् अवश्यं विद्यते।

### ख) सामाजिकव्यवस्थायाः संवर्धनम्

विवाहेन सामाजिकनियमाः, उत्तरदायित्वबोधः, परस्परसहयोगभावः च सुदृढाः भवन्ति। अनेन समाजे शान्तिः तथा सुव्यवस्था वर्धते।

### ग) नैतिकमूल्यानां संरक्षणम्

विवाहसंस्कारः सत्यं, निष्ठा, विश्वासः, संयमः, परस्परसम्मानः, सहिष्णुता इत्यादीनां नैतिकमूल्यानां संवर्धनं करोति।

### घ) सन्तानानां समुचितविकासः

सन्तानानां शारीरिक-मानसिक-नैतिक-शैक्षिकविकासाय स्वस्थपारिवारिकपरिवेशः आवश्यकः, यः विवाहसंस्कारेण सुलभः भवति।

### ङ) सांस्कृतिकपरम्परारक्षणम्

विवाहसंस्कारे विविधाः धार्मिकाः संस्काराः, पारिवारिकरीतयः, उत्सवाः, लोकाचाराश्च संरक्ष्यन्ते। एतेन भारतीयसंस्कृतेः निरन्तरता भवति।

### च) भावनात्मकसुरक्षा

आधुनिकजीवनस्य तन्यतापूर्णपरिस्थितिषु दम्पत्योः परस्परसहयोगः, प्रेमः, विश्वासः च मानसिकसन्तुलनस्य आधारः भवति।

### छ) समानाधिकारभावस्य विकासः

आधुनिकपरिप्रेक्ष्ये विवाहः केवलं परम्परानुगतः सम्बन्धः न, अपितु समानता, परस्परसम्मानः, सहनिर्णयः तथा सहजीवनस्य आदर्शः इति स्वीकृतः।

## 3. आधुनिकपरिप्रेक्ष्ये विवाहसंस्कारस्य आवश्यकता

### क) उत्तरदायित्वपूर्णजीवनस्य निर्माणाय

विवाहः व्यक्तिं कर्तव्यपरायणं, उत्तरदायिनं च करोति।

### ख) स्त्रीपुरुषसमन्वयस्य वृद्धये

समानता, सहकार्यं, परस्परविश्वासः च आधुनिकदाम्पत्यजीवनस्य आधारभूततत्त्वानि सन्ति।

### ग) बालानां लालनपालनाय

सन्तानानां सुरक्षितपालनपोषणाय तथा मूल्यशिक्षाप्रदाने विवाह-संस्कारस्य महत्त्वपूर्णा भूमिका अस्ति।

### घ) सामाजिकसुरक्षायै

विवाहसंस्कारः व्यक्तीनां सामाजिकस्वीकृतिं, पारिवारिकसमर्थनं तथा भावनात्मकसुरक्षां प्रददाति।

### ङ) सांस्कृतिकमूल्यानां संवर्धनाय

आधुनिकजीवनशैलीमध्ये अपि विवाहः भारतीयपरम्पराणां संरक्षणे प्रमुखं साधनम् अस्ति।

### च) सामाजिकसमरसतायै

विवाहसंस्कारः विभिन्नकुलानां, परिवाराणां, समाजस्य च मध्ये सौहार्दं, सहयोगं, एकतां च वर्धयति।

### छ) व्यक्तित्वविकासाय

दाम्पत्यजीवने सहनशीलता, त्यागः, सहयोगः, नेतृत्वम्, निर्णयक्षमता च विकसिताः भवन्ति।

## 4. आधुनिकपरिप्रेक्ष्ये विवाहसंस्कारस्य औचित्यम्

### क) सामाजिकस्थैर्यस्य आधारः

विवाहसंस्कारः परिवारसंस्थायाः मूलाधारः अस्ति। परिवारः समाजस्य प्रथमः शिक्षाकेन्द्रः, नैतिकमूल्यानां संवाहकः, संस्काराणां संवर्धकश्च अस्ति। अतः विवाहव्यवस्था सामाजिकव्यवस्थायाः स्थैर्यं धारयति।

### ख) नैतिकमूल्यानां संरक्षणम्

विवाहः प्रेमः, विश्वासः, उत्तरदायित्वम्, संयमः, सहिष्णुता, त्यागः, समर्पणम् इत्यादीनि जीवनमूल्यानि विकसितुं सहायको भवति। एतानि मूल्यानि आधुनिकसमाजेऽपि समानरूपेण अपेक्षितानि सन्ति।

### ग) मनोवैज्ञानिकसन्तुलनम्

मानवजीवने भावनात्मकसुरक्षा, स्नेहः, सहजीवनम्, परस्परसहयोगः च अत्यन्तमहत्त्वपूर्णाः। विवाहसंस्कारः व्यक्तेः मानसिकस्वास्थ्यं सुदृढं कर्तुं महत्त्वपूर्णं योगदानं ददाति।

### घ) सन्तानपालनस्य उपयुक्तव्यवस्था

यद्यपि आधुनिकसमाजे विविधाः पारिवारिकरूपाणि दृश्यन्ते, तथापि उत्तरदायित्वयुक्ते पारिवारिकपरिवेशे बालानां सर्वाङ्गीणविकासः अधिकः सम्भवति। विवाहः सन्तानपालनस्य व्यवस्थितं सामाजि-काधारं प्रददाति।

### ङ) धार्मिक-सांस्कृतिकमहत्त्वम्

भारतीयसंस्कृतौ विवाहः केवलं सामाजिकसम्बन्धः न, अपितु धार्मिकसंस्कारः अस्ति। यज्ञः, श्राद्धम्, गृहकर्माणि, पर्वोत्सवाः, कुलाचाराः च दम्पत्योः संयुक्तेन आचर्यन्ते। अतः सांस्कृतिक-निरन्तरतायाः संरक्षणे विवाहस्य विशेषं स्थानम् अस्ति।

### च) समानाधिकाराधारितदाम्पत्यम्

आधुनिकचिन्तने विवाहः स्वामित्वस्य न, अपितु सहभागितायाः, समानतायाः, परस्परसम्मानस्य च सम्बन्धः इति मन्यते। एषा धारणा विवाहसंस्कारस्य तात्त्विकगौरवं वर्धयति।

## 5. आधुनिकपरिप्रेक्ष्ये विवाहसंस्कारस्य अनौचित्यम्

### क) पणप्रथायाः अनिष्टप्रभावः

विवाहसंस्कारः नाम पणप्रथा समाजे महतीं समस्यां जनयति। सा स्त्रीपीडनस्य, आर्थिकशोषणस्य, सामाजिकविषमतायाश्च कारणं भवति।

### ख) जाति-वर्णाधारितविवाहप्रतिबन्धाः

धर्मशास्त्रीयपरम्परायां जात्याधारितविवाहनियमाः दृश्यन्ते। आधुनिकसंविधानदृष्ट्या सर्वे नागरिकाः समानाः; अतः जातिभेदा-धारितप्रतिबन्धाः समतासिद्धान्तस्य विरोधिनः मन्यन्ते।

### ग) स्त्रीस्वातन्त्र्यस्य प्रश्नः

प्राचीनव्यवस्थायां कतिपयेषु स्थलेषु स्त्रीणां निर्णयाधिकारः सीमितः आसीत्। आधुनिकसमाजे स्त्री-पुरुषयोः समानाधिकारः, शिक्षा-

धिकारः, आर्थिकस्वावलम्बनम्, स्वनिर्णयाधिकारश्च मूलभूतमूल्यानि स्वीकृतानि।

**घ) विवाहविच्छेदस्य वर्धमानप्रवृत्तिः**

आधुनिकजीवनशैली, व्यवसायिकभारः, पारिवारिकमूल्यानां परिवर्तनम्, व्यक्तिवादः च विवाहविच्छेदस्य संख्यां वर्धयन्ति। एतत् विवाहसंस्कारस्य व्यवहारिकाह्वानरूपेण दृश्यते।

**ङ) सहजीवनस्य (Live-in Relationship) स्वीकारः**

अद्य किञ्चित्समाजे विवाहं विना सहजीवनस्य प्रवृत्तिः वर्धमाना अस्ति। एषा परम्परागतविवाहव्यवस्थायां प्रति वैकल्पिकदृष्टिं प्रस्तुतयति, यद्यपि अस्य विषये विविधाः सामाजिक-नैतिक-विधिकमतभेदाः सन्ति।

**च) व्यक्तिवादस्य प्रभावः**

आधुनिकसमाजे व्यक्तिगतस्वातन्त्र्यं, व्यवसायः, आर्थिकलक्ष्याणि च कदाचित् पारिवारिककर्तव्येभ्यः अधिकं महत्त्वं प्राप्नुवन्ति। एतेन दाम्पत्यजीवने मतभेदाः, तन्यताः, सम्बन्धविच्छेदश्च वर्धन्ते।

**6. आधुनिकपरिप्रेक्ष्ये विवाहसंस्कारस्य तात्त्विकविश्लेषणम्**

तात्त्विकदृष्ट्या विवाहसंस्कारस्य मूलतत्त्वानि—धर्मः, अर्थः, कामः, मोक्षः, प्रेम, विश्वासः, सहकार्यं, उत्तरदायित्वं, समता, न्यायः, लोकसंग्रहः च—सर्वकालेषु प्रासङ्गिकानि भवन्ति। किन्तु विवाहव्यवस्थायां प्रविष्टाः सामाजिकदोषाः, यथा पणप्रथा, जातिवादः, स्त्री-असमानता, बालविवाहः इत्यादयः, संस्कारस्य मूलभावस्य न प्रतिनिधित्वं कुर्वन्ति, अपितु सामाजिकविकृतयः एव सन्ति।

अतः आधुनिकयुगे विवाहसंस्कारस्य पुनर्व्याख्या आवश्यकाः, या धर्मशास्त्रस्य शाश्वतमूल्यानि तथा आधुनिकमानवमूल्यानि—समानता, स्वतन्त्रता, न्यायः, मानवगरिमा, परस्परसम्मानः—एतानि समन्वययति।

**उपसंहारः**

आधुनिकपरिप्रेक्ष्ये विवाहसंस्कारः न केवलं धार्मिकः अथवा सामाजिकः संस्कारः, अपितु उत्तरदायित्वपूर्णजीवनस्य नैतिकाधारः अपि अस्ति। यदि विवाहः समानता, प्रेमः, विश्वासः, परस्परसम्मानः, स्वेच्छा, उत्तरदायित्वम् इत्यादिभिः मूल्यैः सह आचर्यते, तर्हि तस्य औचित्यं सर्वथा सिद्ध्यति। परन्तु यदि तस्मिन् पणप्रथा, जातीयभेदः, लैङ्गिकविषमता, हिंसा, बाध्यविवाहः इत्यादयः दोषाः सन्ति, तर्हि तादृशव्यवहाराणामनौचित्यं निर्विवादम्।

अतः आधुनिकसमाजे विवाहसंस्कारस्य संरक्षणं तस्य मूलधार्मिक-नैतिकमूल्यानां आधारेण, मानवाधिकारसमतासिद्धान्तेन च सह समन्वितरूपेण करणीयम्। एष एव तस्य तात्त्विकदृष्ट्या यथार्थः मार्गः इति निष्कर्षः।

**सन्दर्भग्रन्थाः**


1. पण्डा सिताशुभूषण "धर्मशास्त्रे षोडशसंस्काराः" राष्ट्रियसंस्कृत-विद्यापीठम्, तिरुपति, 2010।
2. शास्त्री जगदीशलाल "श्रीकुल्लुकभट्टविरचितया मन्वर्थमुक्तावल्या व्याख्यया समुपेता – मनुस्मृतिः : अन्तिमसंस्करणम्", मतिलाल बनारसीदास प्रकाशन्, दिल्ली, 2010।
3. शास्त्री राकेश "कुल्लुकभट्टविरचित मन्वर्थमुक्तावली संस्कृत टीका एवं हिन्दीभाषानुवाद - मनुस्मृतिः" विद्यानिधि प्रकाशन्, दिल्ली, 2018।
4. कश्यप शशि "धर्मशास्त्रों में न्यायव्यवस्था का स्वरूप : द्वितीय संस्करण" न्यू भारतीय क कॉरपोरेशन, नई दिल्ली, 2018।
5. https://sanatanprabhat.org/hindi/66325.html
6. https://www.sanatan.org/hindi/a/270.html
7. https://sambhashan.com/vivah-sanskar/
8. https://www.homesciencejournal.com/archives/2021/vol7issue3/PartB/7-3-16-677.pdf
9. https://edit.gisrrj.com/home/article/view/GISRRJ26933